श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकषष्टितमं दशकम् ॥

## यज्वपत्न्युद्धरणवर्णनम्

ततश्च वृन्दावनतोऽतिदूरतो
वनं गतस्त्वं खलु गोपगोकुलैः।
हृदन्तरे भक्ततरद्विजाङ्गना -
कदम्बकानुग्रहणाग्रहं वहन् ॥ **61.1** ॥

ततो निरीक्ष्याशरणे वनान्तरे
किशोरलोकं क्षुधितं तृषाकुलम्।
अदूरतो यज्ञपरान् द्विजान् प्रति
व्यसर्जयो दीदिवियाचनाय तान् ॥ **61.2** ॥

गतेष्वथो तेष्वभिधाय तेऽभिधां
कुमारकेष्वोदनयाचिषु प्रभो।
श्रुतिस्थिरा अप्यभिनिन्युरश्रुतिं
न किञ्चिदूचुश्च महीसुरोत्तमाः ॥ **61.3** ॥

अनादरात् खिन्नधियो हि बालकाः
समाययुर्युक्तमिदं हि यज्वसु।
चिरादभक्ताः खलु ते महीसुराः
कथं हि भक्तं त्वयि तैः समर्प्यते ॥ **61.4** ॥

निवेदयध्वं गृहिणीजनाय मां
दिशेयुरन्नं करुणाकुला इमाः।

इति स्मितार्द्रं भवतेरिता गता -
स्ते दारका दारजनं ययाचिरे ॥ **61.5** ॥

गृहीतनाम्नि त्वयि सम्भ्रमाकुला -
श्चतुर्विधं भोज्यरसं प्रगृह्य ताः ।
चिरं धृतत्वत्प्रविलोकनाग्रहाः
स्वकैर्निरुद्धा अपि तूर्णमाययुः ॥ **61.6** ॥

विलोलपिञ्छं चिकुरे कपोलयोः
समुल्लसत्कुण्डलमार्द्रमीक्षिते ।
निधाय बाहुं सुहृदंससीमनि
स्थितं भवन्तं समलोकयन्त ताः ॥ **61.7** ॥

तदा च काचित्त्वदुपागमोद्यता
गृहीतहस्ता दयितेन यज्वना ।
तदैव सञ्चिन्त्य भवन्तमञ्जसा
विवेश कैवल्यमहो कृतिन्यसौ ॥ **61.8** ॥

आदाय भोज्यान्यनुगृह्य ताः पुन -
स्त्वदङ्गसङ्गस्पृहयोज्झतीर्गृहम् ।
विलोक्य यज्ञाय विसर्जयन्निमा -
श्चकर्थ भर्तॄनपि तास्वगर्हणान् ॥ **61.9** ॥

निरूप्य दोषं निजमङ्गनाजने
विलोक्य भक्तिं च पुनर्विचारिभिः ।
प्रबुद्धतत्त्वैस्त्वमभिष्टुतो द्विजै -
र्मरुत्पुराधीश निरुन्धि मे गदान् ॥ **61.10** ॥

॥ इति श्रीमन्नारायणीये एकषष्टितमं दशकं समाप्तम् ॥